राज्यक्ता, स्त्री, (राज्या सर्षपेण अक्ता म्रक्षिता ।) पिष्टराजिकादधिलवणमिश्रितखण्डालावूखण्डादि । रायता इति भाषा । यथा,—

"संचूर्ण्य निक्षिपेत्तक्रे भृष्टं जीरकहिङ्गु च ।
लवणान्तत्र वटकान् सकलानपि मज्जयेत् ॥
शुक्रलस्तत्र वटको बलहृद्रोचनो गुरुः ।
विवन्धशूलहृद्दाही च श्लेष्मलः पवनापहः ।
राज्यक्तयातिरोचिष्णा माषज्जा तांस्तु भक्षयेत् ॥"

इति भावप्रकाशे कृतान्नवर्गः ॥

राज्याङ्गं, क्ली, (राज्यस्य अङ्गम् ।) राज्यस्योपायः । तत्पर्य्यायः । प्रकृतिः २ । तत्तु अष्टविधं यथा । स्वामी १ अमात्यः २ सुहृत् ३ कोषः ४ राष्ट्रम् ५ दुर्गम् ६ बलम् ७ पौराणां श्रेणयश्च ८ । इत्यमरः । २ । ८ । १८ ॥ "स्वाम्यादयः सप्त पुरस्थलोकश्रेणयश्च राज्याङ्गपदप्रकृतिपदवाच्याः । राज्यं सप्ताङ्गम् । कश्चिन्मते अष्टाङ्गमित्युभयमेव दर्शितम् । यदुक्तं कामन्दकीये ।

'स्वाम्यमात्यश्च राष्ट्रञ्च दुर्गं कोषो बलं सुहृत् ।
परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते ॥'

पौरश्रेण्या सहाष्टाङ्गमपि राज्यं प्रकीर्त्तितमिति । स्वाम्यादयः सप्त परस्परोपकारित्वात् राज्यस्य अङ्गानि उपायाः साधनानि राज्याङ्गानि प्रकृष्टं कुर्व्वन्ति राज्यम् । प्रकृतयः स्त्रीः कभाव इत्युक्तेः क्तिः प्रकृतिः स्त्रियाम् । स्वामी राजा । अमात्यो मन्त्री । सुहृन्मित्रम् । स्वर्णादिभाण्डागारं कोषः । राष्ट्रं जनपदवर्त्ता भूमिः । पर्व्वतादिदुर्गमं पुरं दुर्गम् । बलं सैन्यम् । पौरश्रेणीग्रहणे सिद्धे पुनर्व्वचनं प्राधान्यज्ञापनार्थम् ।" इति भरतः ॥ * ॥ अपि च ।

"स्वाम्यमात्यो जनपदो दुर्गं दण्डस्तथैव च ।
कोषो मित्रञ्च धर्म्मज्ञ सप्ताङ्गं राज्यमुच्यते ॥
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्त्तितः ।
तन्मूलत्वात्तथाङ्गानां राजा रक्ष्यः प्रयत्नतः ॥
षडङ्गरक्षा कर्त्तव्या तथा तेन प्रयत्नतः ।
अङ्गेभ्यो यस्तथैकस्य द्रोहमाचरतेऽल्पधीः ।
वधस्तस्य तु कर्त्तव्यः शीघ्रमेव महीक्षिता ॥"

इति मात्स्ये २१४ अध्यायः ॥

राटिः, स्त्री, (राटयति परस्परमाक्रोशयत्यनेति । रट+णिच्+इन् ।) युद्धम् । इति हेमचन्द्रः । ३ । ४६२ ॥ (राटयतीति । रट भाषणे+स्वार्थे णिच्+इन् ।) शरारिपक्षी । इत्यमरः । २ । ५ । २५ ॥

राडिः, स्त्री, शरारिपक्षी । इत्यमरः । २।५।२५ ॥

राढ़कः, पुं, स्वनामख्यातदेशः । यथा,—

"प्राच्यां मागधशोणौ च वारेन्द्रीगौड़राढ़काः ॥"

इति ज्योतिषतत्त्वम् ॥

राढ़ा, स्त्री, कान्तिः । शोभा । इति मेदिनी । ढ़, २ ॥ पुरीविशेषः । यथा ।

"गौड़ं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी
भूरिश्रेष्ठिकनामधाम परमं तत्रोत्तमो नः पिता ॥"

इत्यादि प्रबोधचन्द्रोदये दम्भवाक्यम् ॥

राढ़ीयः, त्रि, (राढ़ो निवासोऽस्य । राढ़+"छहाच्छः ।" ४।२।११४ । इति छः ।) राढ़देशोद्भवः । यथा,—

"अयनीशाक्तयमानं दुष्टमिति नोच्यते ।
राढ़ीयश्रीनिवासोक्तं तन्मानं स्फुततोऽत्र तु ॥"

इति मलमासतत्त्वम् ॥

रात्रं, क्ली ज्ञानम् । यथा,—

"रात्रञ्च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् ।
तेनेदं पञ्चरात्रञ्च प्रवदन्ति मनीषिणः ॥"

इति नारदपञ्चरात्रे प्रथमरात्रे १ अध्यायः ॥ (रात्रिः । यथा, महाभारते । १३ । १३६ । १९ ।

"क्षेत्रप्रतिग्रहे चैव महत्सूतकयोस्तथा ।
त्रीणि रात्राण्युपोषित्वा तेन पापाद्विमुच्यते ॥")

रात्रकं, क्ली, (रात्रं ज्ञानं तेन कायतीति । कै+कः ।) पञ्चरात्रम् । इति मेदिनी । के, १४६ ॥

रात्रकः, पुं, एकवर्षं वेश्यागृहवासी । इति मेदिनी । के, १४६ ॥

रात्रिः, स्त्री, राति ददाति कर्म्मभ्योऽवसरं निद्रादिसुखं वा । रा दाने+"राशदिभ्यां त्रिप् ।" उणा० ४ । ६७ । इति त्रिप् ।) हरिद्रा । (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।

"लाक्षा कुष्ठं सर्षपाः श्रीनिकेतं
रात्रिर्व्योषं चक्रमर्द्दस्य बीजम् ।
तक्रेकस्थं तत्र पिष्टः प्रलेपो
दद्रूघ्नो मूलकाद्बीजयुक्तः ॥")

एतद्दीपावच्छिन्न-सूर्य्यकिरणानवच्छिन्नकालः । राति इति भाषा । तत्पर्य्यायः । शर्व्वरी २ निशा ३ निशीथिनी ४ त्रियामा ५ क्षणदा ६ क्षपा ७ विभावरी ८ तमस्विनी ९ रजनी १० यामिनी ११ तमी १२ । इत्यमरः । १।४।४ ॥ श्यामा १३ घोरा १४ याम्या १५ तुङ्गी १६ नक्तम् १७ दोषा १८ वासतेयी १९ तमा २० क्षमा २१ शताक्षी २२ चक्रिणी २३ निशिथ्या २४ चक्रभेदिनी २५ शार्व्वरी २६ शय्या २७ वासरा २८ निशाद्वरी २९ । इति शब्दरत्नावली ॥ वसतिः ३० उषुरोषा ३१ निशीथः ३२ निट् ३३ । इति जटाधरः ॥ यामवती ३४ तारा ३५ भूषा ३६ ज्योतिष्मती ३७ तारकिणी ३८ काली ३९ कलापिनी ४० । इति राजनिर्घण्टः ॥ * ॥ तस्याः कारणं यथा,—

"यदा दिक्षु च सर्व्वासु मेरोर्भूगोलकोद्भवा ।
छाया भवेत्तदा रात्रिः ख्याता तद्विरहाद्दिनम् ॥"

इति वह्निपुराणे गणभेदो नामाध्यायः ॥ * ॥ पितृदेवानां रात्रिर्यथा,—

"मासेन च नराणाञ्च पितॄणां तदहर्निशम् ।
कृष्णपक्षे दिनं प्रोक्तं शुक्ले रात्रिः प्रकीर्त्तिता ॥
वत्सरेण नराणाञ्च देवानाञ्च दिवानिशम् ।
उत्तरायणे दिनं प्रोक्तं रात्रिश्च दक्षिणायने ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५९ अध्यायः ॥

अथ रात्रिकृत्यम् । स्मृतिः ।

"पूर्व्वाह्णविहितं कर्म्म न कृतं तत् प्रमादतः ।
रात्रेस्तु प्रहरं यावत् तत् कर्त्तव्यं यथोक्तवत् ॥
दिवोदितानि कर्म्माणि प्रमादात् पतितानि च ।
शर्व्वर्य्याः प्रथमे यामे तानि कुर्य्यादतन्द्रितः ॥"

इति रत्नाकरः ॥

याज्ञवल्क्याङ्गिरसौ ।

"उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च ।
भृत्यैः परिवृतो भुक्त्वा नातितृप्तोऽथ संविशेत् ॥
अग्निहोमोपासने साग्निपरे । उपास्य चेति चकारो वैश्वदेवादिकं समुच्चिनोति । संविशेत् स्वपेत् । तथा च विष्णुपुराणम् ।

"पुनः पाकमुपादाय सायमप्यवनीपते ।
वैश्वदेवनिमित्तं वै पत्न्या सार्द्धं बलिं हरेत् ॥
अतिथिश्चागतं तत्र स्वशक्त्या पूजयेद्बुधः ।
दिवातिथौ तु विमुखे गते यत् पातकं भवेत् ।
तदेवाष्टगुणं पुंसां सूर्य्योढ़े विमुखे गते ॥"

सूर्य्योढ़े अस्तं गते सूर्य्ये । तथा,—

"तत्प्राशदादिशेषञ्च भुक्त्वा सायं ततो गृही ।
गच्छेदस्फुटितां शय्यामपि दारुमयीं नृप ॥"

भोजने सायमिति सार्द्धप्रहरपरं प्रागुक्तात् ॥ अथ रात्रौ शयनविधिः । तत्र सूर्य्ये शय्या च न पातनीया सा च सूर्य्योदयात् पूर्व्वमुत्तोलनीया । तथा च स्मृतिः ।

"भास्करादृष्टशय्यानि नित्याचिरजितानि च ।
सूर्य्यावलोकिदीपानि अश्मत्रा वेश्मानि भाजनम् ॥

व्यासः ।

"शुचौ देशे विविक्ते च गोमयेनोपलेपिते ।
प्रागुदक्प्लवने चैव संविशेत्तु सदा बुधः ॥
मङ्गल्यं पूर्णकुम्भञ्च शिरःस्थाने विधाय च ।
वैदिकैर्गारुड़ैर्मन्त्रै रक्षां कृत्वा स्वपेत्ततः ॥"

गर्गः ।

"स्वगृहे प्राक्‌शिराः शेते श्वाशुरे दक्षिणाशिराः ।
प्रत्यक्‌शिराः प्रवासे तु न कदाचिदुदक्‌शिराः ॥"

मार्कण्डेयपुराणे ।

"प्राक्‌शिरः शयने विद्यात् धनमायुश्च दक्षिणे ।
पश्चिमे प्रबलां चिन्तां हानिं मृत्युं तथोत्तरे ॥"

तथा ।

"नमस्कृत्वाव्ययं विष्णुं समाधिस्थं स्वपेन्निशि ॥"

मार्कण्डेयः ।

"शून्यालये श्मशाने च एकवृक्षे चतुष्पथे ।
महादेवगृहे चापि शर्कराकोष्ठपांशुषु ॥
धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि ।
न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम् ॥
नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः ।
नाकाशे सर्व्वशून्ये च न च चैत्यद्रुमे तथा ॥"

स्वपेदिति शेषः ॥ * ॥ अथ रात्रौ दारोपगमनविधिः । याज्ञवल्क्यः ।

"षोड़शर्त्तुर्निशाः स्त्रीणां तासु युग्मासु संविशेत् ।
ब्रह्मचार्य्येव पर्व्वण्याद्याश्चतस्रस्तु वर्ज्जयेत् ॥"

स्त्रीणां षोड़शनिशा ऋतुर्गर्भाधानयोग्यकालः ।